International Journal of Applied Research 2018; 4(5): 410-412



International Journal of Applied Research

**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2018; 4(5): 410-412
www.allresearchjournal.com
Received: 09-03-2018
Accepted: 12-04-2018

**डॉ. सीताराम गुर्जर**
सह आचार्य (साहित्य),
राजकीय शास्त्री संस्कृत
महाविद्यालय, दौसा,
राजस्थान, भारत

**Corresponding Author:**
**डॉ. सीताराम गुर्जर**
सह आचार्य (साहित्य),
राजकीय शास्त्री संस्कृत
महाविद्यालय, दौसा,
राजस्थान, भारत

# भारतीयवाङ्मये मानवाधिकार-शिक्षा

**डॉ. सीताराम गुर्जर**

**सारांश:**
प्रस्तूयमानेऽस्मिन् शोधलेखे संस्कृतवाङ्गमये प्रदत्ता शिक्षाव्यवस्था शैक्षिकतत्वानि मान्वाधिकाराश्च विवेचिता: । वस्तुत: संस्कृतसाहित्यस्याभूतपूर्व संबन्ध: वर्तते शिक्षया । यतोहि संस्कृतसाहित्ये समुपलब्धेषु ग्रन्थेषु आख्यानकै: नियमैश्च शिक्षैव प्रदत्ता यथा वेदारम्भात् प्राक् धर्मशास्त्रस्याध्ययनं कर्तव्यम् । तत्र एषा शिक्षा विभिन्नेषु प्रकल्पेषु विभक्ता । तत्र अन्यतम: प्रकल्प: मानवाधिकार: । एतस्य विषयस्य बाहुल्यं धर्मशास्त्रीयग्रन्थेषु दरिदृश्यते । तथा च कथन्ते रक्षणीया: तेषां रक्षणोपाया: शोधलेखेनानेन ज्ञास्यन्ति पाठका: ।

**कूटशब्द:** प्राणिषु मानव, शिक्षा मानवस्याधिकार, भारतीयवाङ्मये, मानवाधिकार-शिक्षा

## प्रस्तावना

प्राणिषु मानवः श्रेष्ठ इत्युक्तिमाश्रित्य, मानवः परमात्मनः सर्वश्रेष्ठकृतिः भवति । प्रकृति-परावरस्य संसृष्टिं करोति । सा च प्रकृति: अनेकशः मानवाय सुविधोपलब्धिमपि कारयति। आसा सुविधानां साहाय्येन सः जातकः शनैः-शनैः विवर्धमानो स्वकीयां स्थितं दृढीकरोति। तस्मै शीतत्राणाय ग्रीष्मवारणाय बुभुक्षानिवृत्तये जलसम्बन्धिक्लेशनाशाय च प्रकृत्या प्रमाणां साहाऽयं मिलति । एवं प्रकारेण मानवः स्वदृढां स्थितिमाप्नोति । पुनः स्वस्य नश्वरे सोऽस्मिन् मानवः तस्य अधिकारस्य कृते कर्त्तव्यस्य कृते च प्रयत्नशीलो भूत्वा प्रतिदिनं तस्मिन् कर्मणि नियोजितो भवति ।

सामान्यतया पश्यामः चेत् मानवाधिकारशब्दः शब्दद्वयस्य सम्मिश्रणेन एव भवति । एकः भवति मानवः अपरः अधिकारः । अतः मानवस्य अधिकारः भवति मानवाधिकारः । मानवशब्द: संकृतस्य 'मन' (ज्ञाने) तथा 'मनु' (अवबोधने) धातुभ्यां 'उ' प्रत्यय्ययोगेन मनुशब्दः भूत्वा तस्मात् मनुष्यः तथा मानवशब्दः सिद्धः भवति । तेनैव प्रकारेण अधिकारः शब्दः 'अधि' उपसर्गपूर्वक 'कृ' धातोः घञ् प्रत्ययात् उत्पन्नः भवति ।

भारतीय संविधानस्य 2ए अनुच्छेदे परिभाषा प्रदत्तास्ति यत् “मानवाधिकारेण व्यक्तेः जीवन स्वतन्त्रतया समानतया गरिमया च सह संवद्धम् ईदृशामधिकारम् अभिप्रेतो वर्तते, यः संविधानेन प्रत्याभूत अथवा अन्ताराष्ट्रिय-सन्निहितः भवति एव भारतस्य न्यायालयै प्रवर्तनीममिति” ।

शिक्षा मानवस्याधिकारः मौलिकाधिकारः सर्वेषां शिक्षाव्यवस्थाकरणं शासनस्य दायित्वम् । मनुष्यस्य लक्ष्य परमानन्दावाप्तिरेवं परमानन्द कदा प्राप्नोति तदा प्रतिपत्तिः (ज्ञानं) भवति । ज्ञानमज्ञानं विनाशयति । भारतीयवाङ्मये शिक्षा मानवाधिकार: सृष्टे आरभ्याकालादेव अस्ति । तदानीन्तन शिक्षा प्रणाली भिन्ना आसीत् । इदानीं तु भिन्ना यतः दृश्यते सम्प्रति वैदेषिक-पाश्चात्यपरम्परानुसारिणीयं शिक्षा । शिक्षा मानवस्य मूलाधिकारः आसीत् पुरा अध्ययनमनिवार्य-मासीत् अत एव विष्णुपुराणे उक्तम् –

**अनाश्रमी न तिष्ठेत् क्षणमात्रमपि द्विजः ।**
**आश्रमेण विना तिष्ठन् प्रायश्चित्तीयते द्विजः [1] ।।**

भगवता कृष्णेनापि गीतायां सर्वत्र परमात्मसत्ताया अनुभूतेरेव मानवः अधिकारः सुरक्षितो भवतीत्युक्तम् । यथा –

**विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।**
**शनि चैव श्वपाके च पण्डिताः समदर्शिनः [2] ।।**

नहि एतावता अपितु सर्वेषां समानं मनः चित्तः विचाराश्च मानवाधिकाररक्षायै भवेयुरित्युक्तम् –

**समानो मन्त्रः समितिः समानी**
**समान मनः सहचित्तमेषाम् ।**
**समानं मन्त्रमयिमन्त्रये वः**
**समानेन वो हविषा जुहोमि ।।**
**समानी व: आकृतिः समाना हृदमानि वः ।**
**समानमस्तु वो मनो यथा यः सुहसासति [3] ।।**

अपि च वेदेषु परस्परमादान-प्रदानयोः क्रमविक्रमयोः व्यापार-वाणिज्ययोः वर्णनं मारवाधि काररक्षा प्रति प्रेरयति –

**देहि मे ददामि ते नि मे धेहि नि ते दधे ।**
**निहारं च हरासि मे निहारं च निहराणि ते [4] ।।**

अधुना प्रत्यक्षरूपेण भारतीयवाङ्मयेन मानवाधिकार-शिक्षायाः प्रभावो पूर्णतः परिलक्ष्यते सुसंस्कृतेन भारत प्रधानमंत्रिणा संस्कृतादेवगृहीतः मूलमन्त्र: भारतीयवाङ्मये मानवाधिकारक्षणे सम्यग् चिन्तनं कृतम् । वैदिककालादेव सर्वेषां हितं चिन्तितं यथा –

**भद्रं कर्णेभिः श्रृणुयाम देवा: भद्रं पश्येमाक्षभिर्यजत्राः ।**
**स्थिरैरङ्गैस्तुष्टुवागँसस्तनूभिः व्यशेम देवहितं यदायू: [5] ।।**

'वेदोऽखिलो धर्ममूलम्' इतिवत् चत्वारोऽपि वेदा: निश्चितरूपेण प्रबल मानवाधिकारशिक्षायाः समुद्राः सन्ति । हितेषवीशिक्षाः अस्याः यथा - 'सत्यं वद, धर्मं चर, स्वाध्यान्माप्रमदः, मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथि देवो भव' एतादृशीं शिक्षां मानवो यदा प्राप्नोति आचरति तर्हि जनेषु मानवाधिकार-हननस्यावसरः प्राप्तएव नैष भविष्यति ।
भारतीयवाङ्मये यादृशं धर्मस्वरूपस्य निर्धारणं कृतं तेनैव मानवाधिकारस्य सम्पूर्णाशिक्ष प्राप्ता भवति । यथा –

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।**
**श्रीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् [6] ।।**

भारतीयसंविधाने मौलिकाधिकाराणां नीतिनिर्देशकतत्त्वा-नामन्तर्गतं समानतया: या व्यवस्था कृता सा प्रजातन्त्रस्य मूलभावस्योपरि ध्यानं दत्त्वा एव कृता । मानवाधिकाराणां सार्वजनिकघोषणाय ये त्रिंशत् अधिकाराः वर्णिताः सन्ति ते भारतीयसंविधानस्य न्यायव्यवस्थायाः च समानान्त भवन्ति । एतेषां मानवाधिकाराणां विवेचनं बहुशास्त्रीयपक्षतः अधिकं स्पष्टीकर्त्तुं शक्यते । प्रजातन्त्रस्य मूलभावस्योपरि ध्यान कृता सा शस्यते ।

### अर्थशास्त्रे मानवाधिकारशिक्षा

अर्थव्यवस्था मुख्यतः द्विधा विभज्यते । 1. सभरात्मक आर्थिकी, 2. आर्थिकी अधिशेषः । संभरणात्मक आर्थिकस्थित्यां व्यक्तिः मौलिकावश्यकतानां पूर्तिं कर्तुं न शक्नोति । आर्थिकाधिशेष: संचयस्य आर्थिकी भवति । अस्य स्वल्पाक्रियाभिः भवितव्यस्य कृते संचयीकरणं संभव भवति । संचयस्य आर्थिक्या: परिणामस्वरूपम् अनेके मानवाधिकाराणां विकासः भवति । आर्थिकमानवाधिकारस्यान्तर्गतं सर्वेभ्यः व्यक्तिभ्यः भोजन-वस्त्र-उपार्जन-आवास एवं सामान्यजीवनस्तरेषु सुनिश्चितीकरणाय अधिकारं प्रदीयते । कौटिल्यस्य अर्थशास्त्रे आर्थिक-मानवाधिकाराणां विस्तृतेन वर्णितमस्ति । कौटिल्यः व्यक्तेः आर्थिकाधिकाराणां सुरक्षायै स्पष्टै तथा सुनिश्चितव्यवस्थाभिः सह दण्डानां प्रावधानविषयेऽपि वर्णितवान् ।

### राजनीतिशास्त्रे मानवाधिकारशिक्षा

राजनैतिकाधिकाराणामन्तर्गतं न्यायस्य समक्षं सर्वे जना: समानरूपेण अङ्गीक्रियन्ते । अस्मिन् विचाराभिव्यक्तेः

स्वतन्त्रता-गोपनीयता-राष्ट्रीयता शासने अंशग्रहेणं, चयनम् इत्येषाम् अधिकाराणामुल्लेखः क्रियते । श्रीमद्भगवत्गीतायां स्पष्टरूपेण दृश्यते यत् भगवतः अवतारः दुष्टानां विनाशाय तथा मानवाधिकाराणां स्थापनाय च भवति । आ एवं उक्तं गीतायाम् -

**"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत,**
**अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ।**
**परित्राणाय साधूनां विनाशाय च दुष्कृताम्**
**धर्मसंस्थापनार्थाय संभवामि युगे-युगे"** [7] ।।

**समाजशास्त्रे मानवाधिकारशिक्षा**

समाजशास्त्रिणः मानवाधिकाराणामध्ययनं संबन्धित-व्यक्तिनां कर्त्तव्यानां सन्दर्भे एव कुर्वन्ति । व्यक्तेः सामाजिक मानवाधिकाराणां हननं तदा भवति यदा संबन्धितपक्षः स्वस्य कर्तव्यान् पूर्णं न करोति । मानवाधिकारे ते अधिकाराः सम्मिलिताः भवन्ति, येषां माध्यमेन प्रत्येकव्यक्तिः सामाजिकगतिविधिषु भागग्रहेण स्वतन्त्रः भवति । भारतीयवाङ्मये सामाजिकमान-वाधिकाराः परिवारः, संयुक्तपरिवारः, वंशसमूहः, गोत्रसमूह: उपजातिः, जातिः इत्यादीनां स्तरस्योऽपरि सिद्धान्तेन व्यवहाररूपेण च द्रष्टुं शक्यते ।

**निष्कर्षत**

एतद् वक्तुं शक्यते यत् भारतीयवाङ्मयः अतीव समृद्धः भवति । यस्मिन् मानवाधिकाराणां विभिन्नप्रकाराव्याख्या उपयोगिता-सुरक्षा-क्रियान्वयनस्य विधिः इत्यादिभि संबन्धितानि तत्वानि एवं विशेषता-संबन्धीज्ञानं विभिन्नविज्ञानानां परिप्रेक्ष्यनुसारं ज्ञातुं शक्यते । वर्तमान भारतीयसमाजस्य परिस्थित्यनुसारं तथा प्रचलितशिक्षा-प्रणाली माध्यमेन समाजे कार्यान्वितं कुर्यात् । उपरोक्त वर्णितप्रयासैः भारतीयवाङ्मयस्य सहायता द्वारा एकः सुसमानतास्वन्त्रता तथा न्यायाधारित समाजस्य विकासः कर्त्तुं शक्यते ।

**सन्दर्भ**


1. मिश्र, स्नेहलता, शिक्षायां मानवाधिकारः, अनन्या प्रकाशनम् पुरुणा सुंदरथाना लेन्, पुरी, 2009
2. श्रीवास्तव, सुधाशनी, मानव अधिकार, मध्यप्रदेश हिन्दी ग्रन्थ अकादमी रविन्द्रनाथ ठाकुर मार्ग, बाणगंगा, भोपाल, 2009
3. विष्णुपुराण
4. श्रीमद्भगवद्गीता – ५/९८
5. ऋग्वेद, १० मण्डल, श्लो. – ४,५
6. यजुर्वेद – अध्या. ३/५०
7. यजुर्वेद – अध्या. २५/२१
8. मनुस्मृतिः
9. श्रीमद्भगवद्गीता, अध्या. ४, श्लो. ७,८